শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

ৱিল্লূর্ নডাদূর্ শ্রী শ্রীনিধেঃ কৃতিষু

# ॥শ্রীপুরুষোত্তমষোডশী ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ

# ॥ শ্রীপুরুষোত্তমষোডশী ॥

করিতাজিতকল্লোলিকন্যকাকান্তৰক্ষসে।
করুণাদিগুণাঢ্যায কমলানিধযে নমঃ॥

ৰেলা কাচিত্ সেৰ্যা
নীলাচলমণ্ডিতা জগতি।
শৈলাকারো ভগৰান
মালাকারাদিপূজিতো যত্র॥ ১ ॥

ৰেলাৰনে পূর্ৰমহাপযোধেঃ
নীলাচলে কল্পিতসন্নিধানম্।
তালাঙ্কভদ্রাসহিতং হিতায
কালাম্বুদাভং শরণং প্রপদ্যে॥ ২ ॥

নীলাম্বরেণ হলিনাথ সুভদ্রযা চ
নীলাম্বুদৌঘনিভযা নিজযা চ মূর্ত্যা।
নীলাদিযৌৰতমনোরথকল্পৰল্ল্যা
নীলাৰনীধরৰরে ৰিহরন্তমীডে॥ ৩ ॥

পদ্মাৰতীচেলৰরাঞ্চলেন
ৰিলোচনান্তং পরিমৃষ্টৰন্তম্।
স্নেহাভিষিক্তং জযদেৰরূপং
নীলাচলেন্দ্রং ন জহাতি চেতঃ॥ ৪ ॥

জযদেৰকৰীন্দ্রভারতীপদৰিন্যাসৰশীকৃতাশযঃ।
ইহ নৃত্যসি কিং প্রভো! ন চেতকথমেতন্নু করপ্রসারণম্॥ ৫ ॥

গাযন্তীং জযদেৰভৰ্যভণিতিং কাষ্ঠাহৃতৌ কাননে
নারীং কাঞ্চন কণ্টকৈরতিতরাং ৰিদ্ধাঙ্গজাতো মুহুঃ।
পদ্ভ্যাং দূরমনুৱ্রজন্ রসিকতাং যোদর্শযত্তাদৃশীং
তং ত্বাং নীলধরাধরেন্দ্রনিলযং নিত্যং মতিশ্চুম্বতি॥ ৬ ॥

www.prapatti.com

পুরুষোত্তমপুণ্যদেশগঃ পরমং ব্রহ্ম ভৱান্ন সংশযঃ।
অকরোত্র দদাতি ৱাঞ্ছিতান্যপদো যাতি রথায সদ্ম নঃ॥ ৭॥

পদমানতভক্তমানসে ভৱতা নূনমভূন্নিৱেশিতম্।
অত এৱ ন দৃশ্যতে পদং কমলদ্বন্দ্ৱৱিশেষকোমলম্॥ ৮॥

ৱিপদা ৱিকলা ন পাণ্ডৱাঃ সমিতৌ সন্তু তদর্থমস্ম্যহম্।
ইতি কিং পুরুষোত্তমস্থলে ভগৱন্নেৱমভূঃ কৃপাভরাত্॥ ৯॥

তৱ নাম বিভর্তি যো জনঃ জগতাং নাথ সভক্তিরেষ সঃ।
সৃজতে মধুরাং হি ভারতী স যথা পণ্ডিতরাজনাযকঃ॥ ১০॥

অযি! পাৱন! মঙ্গল! প্রভো! দযযা ত্বং মনসি স্থিতো মম।
অতিপাতককর্মসাদরং কথমেৱং কথযেদমচ্যুত॥ ১১॥

পতিতপাৱনস্তৱং যতস্ততঃ
প্রকটযন্নিদং চেষ্টসে তথা।
মুদমথো মদং যাম্যহং হরে
তৱ যশো মযা তাদৃগেধতে॥ ১২॥

রথৈস্ত্রিভিরলঙ্কৃতামতিৱিশালমধ্যাৱনিং
অনৌঘপরিপূরিতাং নযনমোদসংৱর্ধিনীম্।
অনেকৱিধযানকৈরপি তুরঙ্গমাতঙ্গকৈঃ
মহাপণগণৈর্ৱৃতাং সুভগপূরিৱীথীং ভজে॥ ১৩॥

ভটপঙক্তিমধ্যদেশে
নটনং কুর্ৱন্নিৱাযমাযাতি।
ঘটযিতুমানন্দং নঃ
ৱিটকুলপতিরেষ নীলশৈলেন্দ্রঃ॥ ১৪॥

কিরীটী পুষ্পৌঘৈঃ জননযনবৃন্দং সফলযন
রথোপর্যারোঢুং রচিতগমনো ৱাদ্যনিৱহৈঃ।
মুহুর্দ্বারি দ্বারি স্থিতিমুপগতঃ কামপি শুভাং
জগন্নাথসস্পৃষ্টসসকলদুরিতান্তায ভগৱান্॥ ১৫॥

www.prapatti.com

শ্ৰীকামপালানুজ ! কামতাত !
 শ্ৰীকাম ! নীলাচলকালমেঘ !।
কামৈকসক্তং তৱ পাদকামং
 কামং কুৰুষ্বৈনমতীৱ দীনম্॥ ১৬ ॥

পুৰুষোত্তমষোডশিস্তুতিং
 পুৰুষঃ শ্ৰীনিধিৰাঘৱোদিতাম্।
পুৰুষোত্তমসূক্তিগৰ্ভিতাং
 পুৰুষেষূত্তমতাং ৱ্ৰজেতপঠন্॥ ১৭ ॥

॥ ইতি শ্ৰীপুৰুষোত্তমষোডশীস্তোত্ৰং সমাপ্তম্ ॥

www.prapatti.com